1536.

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 595

Title: Raghuvamsa Tika

595

Incomplete

Raghuvamsha Tikā	Title
by Mallinātha Suri	Author
	Editor
Saka 1691	Year, Vols.
	Publisher
595 Begins & Ends abruptly	Remarks

खलातयायाजमानदीक्षयतीतिविधानात् प्रसन्नेकुशग्रहणं कश्चित् प्रति
निधिनिदर्शनात् इतयमिरं यमवाचंयच्छतीतिक्रनेः मृगश्रृंगपरिग्रहः कंडू
यनसाधनंयस्यास्तांकृष्णसारविशेषणैर्वर्कं इयत इति अधरदीक्षितां संस्कारवि न
स शेषयुक्तांतनुं दाशरथीमाधिवसन् अधितिष्ठन् अतएव समाभासोदीप्तयो यस्मि
न्कर्मणि तद्यथा तथा अभासयत् भासयतिस्म २२ अवभृथेति अव
भृथेनप्रयतोनियतेंद्रियः सुरसमाजसमाक्रमणोचितः देवसमाधिष्ठानार्ह
सः इत्यर्थं उन्नतं शिरो वनमुचे उदकवर्षिणे वननीरं वनं सलिलमितिविश्वः
नमुचेररये केवलं इंद्रायैव नमयतिस्म न कस्मैचित् अन्यस्मै मानुषायेत्यर्थः
२३ वसंतं वर्जयितुमारभते अथेति यमकुबेरजलेश्वरवज्रिणां धर्म
राजधनदवरुणेंद्राणां समाधुरः भारो यस्य सः तं समधुरं अमितविक्रमं एक

र॰टी॰९

७ नराधिपं पूजितपराक्रमं तं दशरथं सेवितुमिव मधुवसंतः सन् समावृत्तो॥
समागतः मधुः पुष्परसे दैत्यभेदे मधुश्चैत्रवसंतयोरिति विश्वः नवैः कुसुमैः उप
लक्षितः रिक्तहस्तेन नोपायाद्राजानं देवतं गुरुमिति वचनात् पुष्पसमेतो
राजानं सेवितुमुपागत इति भावः २४ असकृदिति एकरथेनाद्विती
यरथेन तरस्विना बलवता हरिहयस्येंद्रस्याग्रसरेण धनुर्भृता असकृदे
व अकुंठो दिनकरस्य अभिमुखाः रणरेणवः अभिमुखोत्थिता इत्यर्थः सुर
द्विषां दैत्यानां रुधिरेण रुधिरे निवारिताः २५ जिगमिषुरिति धनदा ७
ध्युषितां कुबेराधिष्ठितां दिशं जिगमिषुर्गंतुमिच्छुः रथयुजा सारथिनानूरु
णा परिवर्तितवाहनो निवर्तिताश्वो रविर्हिमस्य निग्रहे निराकरणे दिन
मुखानि प्रभातानि विमलयन् निर्मलयन् विशदयन् नगं मलयमत्यजत्

दक्षिणादिशामत्यजत् २६ हिमविवर्णितेति हिमेन विवर्णीकृताः चंदनवृक्षा
णां पल्लवा यस्य तं मलयाख्यमद्रिं विरहयन् परित्यजन् उत्तराभिमुखो रविः
सूर्यः अह्ना विरहो अहर्विरहो रजनी तेन नैध्रुवं निश्चितं भेदो ययोस्तौ तयोः तस्मिन्वा
विहतयोः पक्षिणोः चक्रवाकयोः स्त्रीपुंसयोः कृपयवशानैर्यो गच्छति
स्म वसंतनिशाया अल्पत्वात् अह्नो महत्वात् उत्प्रेक्षा मधुवमेतलक्षे
पायः २७ कुसुमेति आदौ कुसुमजन्म ततो नवपल्लवाः तदनु अनुलक्ष अभवन्
णा इति कर्मप्रवचनीयत्वात् द्वितीया यथासंख्यं तदुभयानंतरं षट्पदा
नां कोकिलानां च कूजितमित्येवं प्रकारेण यथाक्रममुत्क्रमेणानतिक्रम्य म
द्रुमवतीं वृक्षभूयिष्ठां वनस्थलीं अवतीर्य उत्तीर्य मधुर्वसंतः आविरभू
त् केषांचित् द्रुमाणां पल्लवप्राधान्येति केषांचित् कुसुमप्राग्यस्यात् ॥

र.टी.३ नोत्क्रमस्य दृष्टांविरोधः २७ परभृतेति परभृता कोकिला [redacted]

८ [redacted] लघुवाक् प्रियसखीव मदनक्षुत तेनेनसः कामपीडितानप्रि

यतमान् कलहांतरे योषितां दुरवापाः समागमायेषांतान् दुरवापसमागमा

न् अकरोत् चक्रे २८ नयेति नयो नीतिरेव गुणस्तेन अथवा नयेन गु

णेः शौर्यादिभिरूपचितां सतामुपकारः फलं यस्यास्तां सदुपकारफलां भू

पतेर्दशरथस्य श्रियमर्थिनइवमधुना वसंतेन संभृतां सम्यक्पुष्टां सरसः

अलिनीर संबंधिनी कमलिनीं पतत्रिणं अलयो भृंगा नीरपतत्रिणः जलपक्षिणो

हंसादयश्च अभिययुः अभियांतिस्म २९ कुसुममिति ऋतुरस्य प्रा ८

प्तं आर्तवं ऋतोरणित्यण् प्रत्ययः नवप्रत्यग्रमशोकतरोः केवलं कुसुम

मेव स्मरस्य दीपनमुद्दीपनं न किंतु विलासिनां मदयितामदकः दयिता

मादकदयिताश्रवणार्पितः किसलयप्रवालोपि पल्लवसंतानोपि स्मरदीपनः

३० विरचिताइति मधुना वसंतेन उपवनश्रियां विरचिताअभिनवाः

पत्रविशेषकाः पत्रलताइव स्थिताः मधुनां मकरंदानां दाने विशारदाः धनुराः

कुरबकास्तरवो मधुलिहां मधुपानां रवकारणतां ययुः भृंगाः कुरबकमधू

नि पीत्वा जगुरित्यर्थः दानशौंडानर्थिजनास्तुवंतीतिभावः ३१ सुर

वदनेति सुवदनावदनासवेन कांतामुखमद्येन संभृतो जनितः तत्तस्य दो

हदमिति प्रसिद्धः तत्रास्यासवस्यानुवादी सदृशो गुणो यस्य स तदनुवा

दिगुणः कुसुमोद्गमः कर्ता मधुलोलुपैरायतपंक्तिभिः दीर्घपंक्तिभिर्मधुक

रैर्बकुलं बकुलवृक्षं आकुलमकरोत् ३२ उपहितमिति शिशिराप

गमश्रियावसंतलक्ष्म्या किंशुके पलाशवृक्षे पलाशा किंशुकः पर्णभ्रमस्या

र.टी.२ यष्टियो स्तुपुष्पकः इत्यमरः उपहितंतमेव दत्तं प्रफुल्लजालं कुसुमलसंहतिः म
६ देनयाचितलज्जया अपसारितत्रपयाप्रणयिनिप्रियतमे उपहितं दत्तं नखव
क्षतमेवमंडनंतेन थ खक्षतमंडनं तद्दिवशोभते ३३ व्रणेति व्रणैः दंतक्षतै
र्गुरुभिः उर्धरैः प्रमदानामधरोष्ठैः सहहिमस्याथाकरत्वोऽसह्यं जघनेषु
निर्विषयीकृतानि रवकाराक्रांतमेखलाये नत छेत्या त्माजितमेखलमित्य
र्थः तावत्तदावसंते अशेषं निःशेषं यथातथा अपोहितुं निरासितुं नालं ख
लुनराक्तोहि किंतु ■ विरलंकृतवान् चकार ३४ अभीति अत्र चूतलता
यानर्तकीसमाभिधीयते अभिनयान् नर्तकव्यंजकान् व्यापारां अभिव्यंजका
न् व्यंजकाभिनयोसमावित्यमरः परिनेतुमभ्यसितुं उद्यतेव रुचिताकुतःम
लयमारुतेनकंपितपल्लवापल्लुवशब्देनहस्तोपगम्यते सकलिकासको

रकाकलककाकोरकः पुमानित्यमरः सहकारलताकलिः कलहोद्वेष उच्यते
कलिः स्यात्कलहेशूरे कलिरंत्ययुगे पुधीत्यमरः कामोरागस्तं जितामपि
विजितरागद्वेषाणामित्यर्थः मनोमदयादित्यर्थः मदयुक्तं चकार ३५
प्रथमभिति सुरभिगंधोयासांतासुसुरभिगंधिषु गंधस्येत्यादिना इकारः
कुसुमान्यासांसंजातानिकुसुमिताः तासुवनराजिषुवनपंक्तिषु अन्य
भृताभिः परस्थताभिः कोकिलाभिः प्रथमंप्रारंभे उदीरताः उक्ताः अतएव
मिताः परिमिताः गिरः आलापाः प्रतिविरलाः स्तोकोकामुग्धवधूनां
कथा इव शुश्रुविरे श्रुताः ३६ इत्रानेति इत्रानचंद्रिकयाज्योत्स्नया
रोषभितं व्यंवभासितं मधोः वसंतस्य हसितमिव आसवस्य गंधोस्यास्तीत्यास
वगंधिश्वासिः शुभैः रसोयस्यततशुभिरसंचिरसंचितं संभृतं तिलकपुष्पं

र॰टी॰३ तिलककुसुममालाभिः इच्छद्भिः षट्पदैः भ्रमरैः असेव्यत सेवितं हसितमपि
१० श्रुतिरसंसंस्थितं आसवगंधि चेतिमकरंदवाकृत्येनविरसंस्थितत्वाउत्प्रेक्षा
३६ श्रुतीति श्रुतिसुखाः श्रवणमधुराः भ्रमरस्वना एव गीतयो यासां ताः कु
सुमान्येव कोमला दंतरुचो दंतकांतयो यासां ताः अनेन संगतत्वाविवक्षितं उप
कि वनांतलताः पवनाहतैः कंपितैः किसलयैः साभिनयैः लयशब्देन लयानुगतो सलयैः
भिनयो लक्ष्यते उपवनांतेपवनाहतैरिति सच्छ्रियत्वाभिधानात् पाणि
भिरिव बभुः भांतिस्म अनेन लतानां नर्तकीसाम्यं गम्यते ३७ ललितेति
अंगनाः ललितविभ्रमबंधविचक्षणं मधुरविलासघटनोपदेशाय ऽभरं सु १०
रभिणा मनोहरेण गंधेन पराजितकेसरं निर्जितबकुलीपुष्पं अथ केसरो ब
कुल इत्यमरः स्मरस्य सखायं स्मरसखं स्मरोद्दीपकमित्यर्थः मधुमद्यं अर्द्ध

र्चाः पुंसि चेति पुल्लिंगता उक्तं च मकरंदस्समधस्यमाक्षिकस्यवा चकः
अर्द्धर्चादिगणेपाठः पुंनपुंसकयोर्मधुरितिअमरः। पतिषु विषयेष्वखंडनं स
वर्जितं अनुरागभंगरहितं यथातथा निर्विविशुः परस्परानुरागपूर्वं दंप
तिभिः सहबुभुजुरित्यर्थः ३८ शुशुभिरे इति विकचतामरसाः विकसित
कमलाः मदेनकलाः अव्यक्तमधुरध्वनितः उदककलोला विहंगमाः लैजेप्रिमप
क्षिणोहंसादयो यासु ताः मदकलोदककलोलविहंगमा गृहेषु दीर्घिकाः [illegible] प्याः वा
स्मितेन चारूणि विलोचनानि यासां ताः श्लथाः सिंजिताः मुखरयः मेखलाः या शब्दिताः
सां ताः सिंजिते निकर्तरि क्तः स्त्रिय इव शुशुभिरे ३९ गमयितुमिति मधौ
वसंते वतर इति खेदे पांथानां बंधुजनो विदेशस्थ स्त्रीमूहः महतींमारदीर्घसुखेन
गमयितुमति नाहमितुं नप्रभुर्नसमर्थः इति दयातरवकृपावशादिव रजनी

र.टी.२ हारवतीहारचंद्राराविरायतादीर्घा नवभूव क्षेपोयं मधुवसंतेरात्रयोरूस्वाभा
वंतिभावः नअभवत् ४० उपययाविति मधुनामधुसमये नरवंडिताः कलाकला
संगमिताः क्षियंते खलूत्तरायणरात्रयः खंडितारव्यानायिका च ध्वन्यते हिम
करोदयेन चंद्रोदयेन पांडु मुखस्य प्रदोषस्य वक्रस्येव छवियस्याः सारज
न्येव वधूः इष्टसमागमतिहत्तिं प्रियसमागमसुखं अनितयाऽप्राप्तयाऽण्या
तोः कृतरिक्तः वनितया सदृशा तुल्यां तनुतां सूक्ष्मतां कार्श्यं उपययो ४१
तिलकेति तिलकानां वृक्षविशेषाणां मस्तकमुपरिभागः तदेव हर्म्यं प्रसादः
तत्र रूढतास्यदेनिर्विष्टैः कुसुमानां मधुनो मधुमद्यस्यानुषंगः संपर्कः तेन सुगंधि
भिः स्मरध्रुतैः सकामैरयुतैः वकुभिरबलानां सखायोऽबलासखास्तैर्भृंगयु ११
तैर्भृंगाए वनिलासिनः तैः कमलमधुरं कलमगीयत पुंस्कोकिलकामिनीभी
ध्वन्यते कामिनो हि हर्म्यंगरूढाद्रियाः सकामाः कुसुमैरितेत्याक्षिप्यते तस्य
मधुनो मद्यस्यास्वादनेन सुरभयः कलं गायंति अबलासखैरिति राजाहः सखि
भ्यष्टत्व अयुते रित्यत्र यद्यप्यमतत्रादेन रहसहस्त्रावाधीयंते तथापि बकुलत्व
मुपलक्ष्यते ४२ अपेत्ति हिमकरश्चंद्रोऽपतुषारतया अपगतनीहारतया
विशदप्रभै निर्मलकांतिभिः सुरतरागश्रमनोदिभिः सुरतसंगखेदहारिभिः अं
शुभिः किरणैः मकरार्जितकेतनं मकरेण ऊर्जितं उच्छ्रितं केतनं ध्वजो यस्य तं
लब्ध्वा वकाशात्वादुच्छ्रितध्वजमित्यर्थः कुसुमचापमतेजयन्नत्यशातयन् मदनं
तं जितनिशानद्रतिभातोणर्यतात्लुङ् सहकारिलाभात् कामोपि तीक्ष्णो
भूदित्यर्थः ४३ अनलसेति अनलसा कलकूजितं प्रविणान्यभृता कोकि
ला यस्यां सा कमले परिलिप्ता पद्मरागयुक्तेन मरुता पवनेनेरिता कंपिता

अनंस्य अधीतमिति अनलसा ह.२

र.टी.२ वाकुसुमभारैः पुष्पभारैर्नतानम्रा अशोकलता अशोकतरुवल्ली अध्वगयो
१२ षितां पांथवधूनां अशोकमतिदुःखितं मनो नैलसौद्दाग्निरूपं चकार विभाषा अशोत
सातिक्रान्त्यर्थे इति सातिप्रत्ययः ४४ विरहादिति हिमवर्षिणः शिशिरस्यांते:
अभ्रलोपम तां४ परंतेत्प्रसिद्धं वसंताख्यं वस्तु सुधासाम्यं प्राप कीदृशं विशदादाऊपतुषारत्वा पयो४
ल्निर्मलाः चंद्ररश्मयो यत्र तत्तथा सुखयतीति सुखः पचाद्यच् सुखकोमल
यानिलो यत्र तत्तथा पुष्पितवृक्षरवोन्मदाः कोकिला यत्र तथा उपभोगरसं
भोगशृंगारे वप्रस्तुरतादिति सामान्यापेक्षया नपुंसकत्वनिर्देशः ४५
ऊतेति ऊलदूतासानदीप्तिआज्याभिः प्रज्वलिताग्निप्रभं यत्कुसुमं कर्णि १२
कारमित्यर्थः वनश्रियः वनलक्ष्म्याः कनकाभरणस्यप्रतिनिधिरभूदिति
शेषः दलेषु केसरेषु चपेशलं सुकुमारं पत्रकिंजल्कमित्यर्थः आहितं प्रिये
रितिशेषः तत्कुसुमं युवतयः अलकेषु कुंतलेषु दधुः ४६ अलिभिरिति

अंजनबिंदुमनोहरैः कज्जलकणसुंदरैः कुसुमपंक्तिषु निपतंतियेतैः अ
लिभिः अंकितः चिह्नितः तिलकः क्षुरकः श्रीमान् नामवृक्षाः तिलकः क्षुरकः
श्रीमानित्यमरः तिलकविशेषकः तमालपत्रतिलकचित्रकाणि विशेष
कं द्वितीयं च तुरीयं च स्त्रियामित्यमरः प्रमदामिव नखलु न रोगभय वनस्थली
तिस्म इति न अपितु अरोभयतेत्यर्थः लट् स्मेति स्मशब्दयोगात् भू
तार्थे लट् ४७ अमदयदिति तरुचारु विलासिनी तरोः पुंसश्चारु
विलासिनी नवमल्लिका सप्तलाख्या लता सप्तला नवमल्लिकेत्य
मरः मधुनो मकरंदस्य मद्यस्य च गंधेन सनाथया गंधप्रधानयेत्य
र्थः किसलयमेवाधरस्तत्र संगतरागया प्रसृतरागयेत्यर्थः कुसु
मैः संभृतया संपादितया कुसुममधुरयेत्यर्थः स्मितचारुहासकांत्या

र.टी.२ मनःपरवशतामिति शेषः अमदयत् ४८ अरुणेति विलासिनो विल
९३ सनशीलाः पुरुषाः वृ कषसंलसेत्यादिना घिनुण्प्रत्ययः अरुणस्यानूरोरा
गमारुण्यं निषेधयति तिरस्कुर्वतीति अरुणरागनिषेधीनि तैः कुसुमादि
रंजनात्तत्सदृशैरित्यर्थः तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधंतीति तस्य
चानुकरोतीति शब्दः सादृश्यवाचक इति दंडी अंशुकैः वस्त्रैः श्रवणेषु
लब्धपदैर्निवेशितैरित्यर्थः यवांकुरैश्च परभृतानां विरुतैः कोकिला
कूजितैश्च स्मरबलैः कामसैन्यैः अबलायामेकत्ररसो येषां तैरबलै
करसाः स्त्रीपरतंत्राः कृताः ४९ उपचितेति शुचिभिः शुभ्रैः कणैः रजो ९३
भिः उपचितावयवा पुष्टावयवा अलिकदंबकयोगमुपेयुषी प्राप्ता तिल
कातिलकवृक्षोत्थामंजरी अलकेषु यज्जालकं आभरणविशेषः तस्मिन्

मौक्तिकैः सदृशाकृतिः अलक्ष्यत भृंगसंगिनी शुभ्रा तिलकमंजरी नीला
लकासक्ता जालमिवालक्ष्यतेति वाक्यार्थः ५० ध्वजेति अलिव्रजः
मदनस्य कामस्य धनुर्भृतो धानुष्कस्य ध्वजपटं पताकाभूतं ऋतुश्रियो व
संतलक्ष्म्याः छविकरं शोभाकरं मुखचूर्णं मुखालंकारचूर्णीभूतं सप
वनं यदुपवनं तस्मिन्नुत्थितं कुसुमानां केसरेषु किंजल्केषु यो रेणुस्तम
न्वयुः अगच्छन् यातेर्लङ् ५१ अनुभवेति नवा दोला प्रेखा यस्मिन्
नवदोलं ऋतूत्सवं वसंतोत्सवं अनुभवन् अबलाजनः पटुरपि निपु
णो अपि प्रियकंठस्य जिघृक्षया ग्रहीतुं आलिंगितुमिच्छया आसनर
ज्जुपरिग्रहे पीठरज्जुग्रहणे भुजलतां बाहुलतां जलतां शिथिलत्वं
जलडयोरभेदः जडतामनयत् दोलाक्रीडासु पतनभयेन प्रियकंठमा

र॰टी॰९
१४

।क्लिवान्नित्यर्थः ५२ त्यजतेति बतेत्यामंत्रणे विस्मयामंत्रणे बतेत्यमरः
बतऊंगनानामानं कोपंत्यजत स्त्रीणामीर्ष्यास्तेनः कोपोन्योन्यासंगीनित्रि
यइत्यमरः विग्रहे विरोधेः अलं विरोधेन कार्यमित्यर्थः गतमतीतं चतुरउप
भोगक्षमं वयोयौवनं पुनर्नैति न गच्छति इत्येवंरूपे स्मरमतेस्म राभि
प्रायेनपुंसके भावेक्तः परभृताभिः कोकिलाभिः निवेदिते सती ववधूज
नोरमतेस्म कोकिलाकूजितोद्दीपितस्मरस्तु जनः कामशासनभया
दिवोध्धं खलमखिलेयादित्यर्थः ५३ अथेति अथानंतरं मधुं मथ्नाती १४
तिमधुमाद्दिष्णुसंपदादित्वात् क्विप् मधुवसंतः मथ्नातीति मथः पचाद्यच्म
नसोमथो मन्मथः कामः तेषां विष्णुवसंतकामानां सान्निभः सदृशः मधुमे
तमधुमन्मथसन्निभं मृगयाभि रतिं अनुभूय मृगयाविहारं चक्रमे आव

व्यसनासंगदोषं हरति परिचयमिति असौ मृगया चललक्ष्यनिपातनैः
चललक्ष्याणि मृगाणि तेषां निपातने परिचयमभ्यासं करोति भयरुषोः भय
क्रोधयोः तादिंगितबोधनं तेषां चललक्ष्येण इंगितस्य चेष्टितस्य भयादिलिंग
भूतस्य बोधनं ज्ञानं च करोति नतुशरीरं श्रमस्य जयात् निरायासात् प्रगुणां
प्रकृष्टलाघवादिगुणवतीं च करोति अतो हेतोः सचिवैरनुमतो ययौ सर्व
न्वेतद्धि छलोपयोगीत्यतस्तदपेक्षया मृगया प्रवर्तिर्न व्यसनतयेति भाव ४
५५ मृजेति मृगाणां वनं मृगवनं तस्योपगमः प्राप्तिः तस्य क्षमार्हं वेषं बिभर्ती
ति तथोक्तः मृगयाविहारानुगुणवेषधारीत्यर्थः विपुलकंठे निषिक्तः आरास ते
येन कंठलग्नधन्वानो स वितेव न सविता पुरुषो श्रेष्ठ उपमितमिति समा
सः स राजा अश्वखुरोच्छितरेणुभिः गगनं विनानंतु ध्व असदियाकरोत ग

९.टी.८ गनंनलक्ष्यतेत्यर्थः वितानंतुउल्लोचेऽस्त्रियोरितिविश्वः अथवासवितानमित्येकं
१५ पदंउल्लोचसहितमिवाकरोत् अस्त्रीवितानमुल्लोचइत्यमरः ५६ लघय
तिस्मेति अलमत्यर्थंकुसुमितःपुष्पितोरुम्भेदैःमत्तैःभृंगैरीरितोनिर्घोषितः
नमितःस्मरेसमाधिमेकाग्रतांकरोतीतिस्मरसमाधिकरः सहकारतरुस्तरु
णीभिःभर्तांस्वीकृतांप्रत्यपराधेनोत्पन्नंअपिकरोषस्यभावःअपिकरोप
तांप्रवृद्धकोपतांनलंघयतिस्मेति नअपितुलंघयतिस्म चूतावलोकने
नस्त्रियोरोषंहित्वाप्रियवंशावभूवुरितिभावः द्वौनञौप्रकृतिमथोसातिशयं
गमयतःश्लेषोयं ५७ ग्रथितेति वनमालयावनपुष्पस्रजाग्रथितमौलिःबद्ध १५
धम्मिलःतरूणांपलाशैःपत्रैःसवर्णःतुल्यःतनुच्छदोवर्मयस्यतथोक्तःइदंवर्मणः
पलाशसावर्ण्याभिधानंमृगादीनांविश्वासार्थंतुरगस्यवल्गानेनगतिविशेषेणचंचले

कुंडलेयस्यसदशरथःरुरुभिःमृगविशेषैःश्वारितायाभ्रमयःता
सुविरूवेविदिदृक्षते ५८ तन्विति तनुषुलतासुविनिवेशितविग्रहाःसंक्र
मितात्मनःभ्रमरेषुसंक्रमितईक्षणद्वन्द्वयोर्दृग्व्यापारादयोयासांताःवनदेवता
सुनयनंसुलोचनंनयेननीत्यानंदितास्तोषिताःकोशलायनेनतंदशरथंअध्व
निमार्गेददृशुःपश्यंतिस्म अपन्नपावनतयादेवताअपिगूढवत्यातंदद
शुरित्यर्थः ५९ श्वगणीति सदशरथःभृतांगणःश्वगणाःयेषांसंतीति
श्वगणिनःश्वग्राहिणःवागुरामृगबंधरज्जुःवागुरामृगबंधनमित्यमरः
तयाचरंतीतिवागुरिकाजालिनःचरतीतिठक् द्वौवागुरिकजालिकौइ
त्यमरः तैश्चप्रथमंआस्थितंअधिष्ठितंव्यपगताअनलादावाग्नयोदस्यवस्त
स्कराश्चयस्मात्तत्तथोक्तंदस्युतस्करमूषकाइत्यमरः [illegible]धनमाशो

र.टी.९ मातुरंकमिव प्रविविक्षुः आप्तैरस्त्रानुगतः प्रविशेद्यासंकटेन च ग्रहणेन चातिष्ठेदिति
१६ का मंदकः स्थिरादेहापंकादिरहिता तुरंगमयोग्या भूमिर्यस्य तत् निपानभृत् आरुक्ष्यु
क्षं आहवस्तु निपातनं विशेषैश्चयुपचितं समृद्धं स्तं विवेश ६० अथेति अनाधि
मनो व्यथारहितः नरेषु वरो नरश्रेष्ठः रवेण रोषिताः केसरिणः सिंहा येन स राजा
कनकमिव पिंगलः पिशंगो यस्तडिदेव गुणो मौर्वी तेन संगतं संयुतं त्रिदशायुध
मिंद्रचापं नभस्यो भाद्रपदमास इव स्युर्नभस्यः प्रौष्ठपद भाद्र भाद्रपदाः समाः इ
त्यमरः अधिज्यमधिरूढमौर्वीकं धनुराददे जग्राह ६१ तस्येति स्तनप्रण
यिभिः स्तनप्रार्थिभिः एणशावैः हरिणशिशुभिः पृथुकः शावकः शिशुरित्यम १६
रः मुहुर्व्याहन्यमानं हरिणीनां गमनं गतिर्यस्य तत् कुरंगगर्भे येषां तानि मु
खानि यस्य तत् कुरंगगर्भमुखं तस्य यूथस्याग्रसरः पुरः सरो गर्वितः दृप्तश्च ह

रसारो यस्य तत् मृगाणां यूथं कुलं सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकमित्य
मरः तस्य दशरथस्य पुरस्तादाविर्बभूव ६२ तदिति जवनो जवशीलः यु
चक्रम्येत्यादिना युच्प्रत्ययः तरस्वी त्वरितो वेगी प्रजवी जवनो जवीत्यमरः
तं वाजिनमश्वं गतेनारूढेन तूणीरेषुभिः वक्रादिभ्यश्चेति स्त्रियां ङीप् त
स्य मुख्याद्द्विवरात् उद्धृत नराशेण राज्ञा प्रार्थितमभियानं च प्रार्थिना कथ्य
ते बुधैरिति केशवः अतएव विशीर्णा पंक्तिसंबंधिभावो यस्य तत् मृगयूथं
कर्त आद्रिभयाद्दश्रुसिक्तैः आकुलाभयविक्लवाय्येदृष्टिपाताः सर्वातिरिक्तैः दु
पवनप्रेरितैः इंदीवरदलं दृग्देरिव वनं श्यामीचकार ६३ लक्ष्मीकृतस्येति
हरिरिंद्रो विष्णुर्वा तस्य वप्रभावो यस्य सः धन्वी धनुष्मान् स नृपो लक्ष्मीकृतस्यावि
द्धमिष्टस्य हरिणस्य स्वाप्रियस्य देहं व्यवधायातुरा गादंत स्थायस्थितासह

र०टी०३ चरतीतिसहचरी तां पश्चादिषुचरतेः टित्करणात् ङीप् यथाह वामनः अनुचरती
११ ति चरेष्टित्वादिति सहचरीं तां सहचरीं हरिणीं प्रेक्ष्य कामितया स्वयं च कार्मुककारः कृ
पामृदुमनाः करुणार्द्रचित्तः सन् आकर्णकृष्टमपि बाणं प्रतिक्रमं प्रति संहारमपि
इत्यर्थः बाणं प्रति संजहार निपुणत्वादिति भावः निपुणत्वं धन्वीत्यनेन ग
म्यते ६४ तस्येति त्रासात् भयात् अतिमात्रचटुलैरत्यंत चंचलैर्नेत्रैः प्रो
षप्रियानयनविभ्रमचेष्टितानि चतुरकांतविलोचनविलासव्यापारान्
स्मरयत्सु सादृश्यात् स्मारयत्सु अपरेषु मृगेषु शरान्मुमुक्षोस्तस्य नृपस्य कर्णा
तं एत्यपि अप्यनिविडोपि दृढोपि मुष्टिर्विभिदे स्वयमेव भिद्यते स्म कर्मकर्त
रि लिट् कामिनस्तस्य प्रियाविभ्रमस्मृतिजनितकृपातिरेकात् मुष्टिभेदो न त्व ११
नेन नैपुण्यादिति तात्पर्यार्थः ६५ उत्तस्थुरिति स नृपः मुस्ताप्ररोहाणां मु

स्तांकुराणां कवलाः ग्रासाः तेषाम — —वैः अर्धावृत्तमुखभ्रंशिभिः शाले
रनुकीर्णं व्याप्तं आयाताभिर्दीर्घाभिः पदपंक्तिभिः सुव्यक्तं शिशिरपल्लव
पंकमध्यात् उत्तस्थुः उत्थितस्य दुत्तवराहकुलस्य मार्गं जग्राह अनुस
सार ६६ तमिति वराहः वाहनादश्वादीषदवनतोत्तरकायं किंचिदान
तपूर्वकायं विध्यंतं प्रहरंतं उद्धतसटाः ऊर्ध्वकेसराः संतः सटाजटाकेसरयो
रिति विश्वः प्रतिहंतुमिच्छुः प्रतिहंतुमैच्छन् अस्य नृपस्येषुभिः सहसा अ
घनानामाश्रयेषु अवष्टंभेषु वृक्षेषु विद्धमात्मानं न विविदुः एतेन व
राहाणां मनस्वित्वमभयं नृपस्य हस्तलाघवं चोक्तं ६७ तेनेति अ
भिघातेन रभसः औत्सुक्यं यस्य तस्य अभिहंतुमुद्यतस्येत्यर्थः वन्यस्य
वने भवस्य महिषस्य नेत्रविवरे नेत्रमध्ये तेन नृपेण विकृष्य आकृष्य मुक्तः

र.टी.३ पत्रीशरः पत्री रोपइषुर्द्वयोरित्यमरः विग्रहं माहिषस्य देहं निर्भिद्य विदार्य शोे
१८ णितलिप्तो न भवतीति अशोणितलिप्तः पुंखो यस्य स तथोक्तः सन् तं महिषं प्रथ
मं पातयामास स्वयं पश्चात्पपात कृञ्चानुप्रयुज्यते लिटीत्यत्रानुशब्दस्य व्यव
हितपर्यस्तस्तं प्रयोगनिर्देशत्वात्पातयां प्रथममासेत्यपप्रयोग इति पाणिनीयाः
यथाह वार्त्तिककारः विपर्यासनिरृत्यर्थं व्यवहितनिवृत्त्यर्थं चेति ६८ प्राय
इति नृपतिर्निशितैः क्षुरप्रैः शरविशेषैः खड्गान् खड्गमृगान् गंडके खड्गखड्गि
नावित्यमरः प्रायो बाहुल्येन विषाणपरिमोक्षेण शृंगभंगेन लघून्यगुरू
णि उत्तमांगानि शिरांसि येषां तान् चकार न त्ववधीदित्यर्थः कुतः दृप्तविनया १८
धिकृतः दुष्टनिग्रहनियुक्तः स राजा परेषां प्रतिकूलानां अभ्युच्छ्रितं उन्नतं उत्तमा
गं प्रधानं शृंगं प्राधान्य सानोः शृंगमित्यमरः किं तु न ममर्ष न सेहे दीर्घमायुर्जीवितका
लं आयुर्जीवितकालानित्यमरः न ममर्ष किं तु ममर्ष एवेत्यर्थः ६९ व्या
घ्रानिति अभीर्निर्भीकः सन् गुहाभ्यो अभिमुखोत्पतितान् सन्मुखागतान् वायुना
रुग्णान् भग्नान् फुल्लाः विकसिताः आसनस्य सर्जकस्य वृक्षस्य ये अग्रविट
पास्तान् निवाहितान् वृक्षशाखाभूतानित्यर्थः व्याघ्राणां चित्ररूपत्वादुपमानं
फुल्लविशेषणं अनुपसर्गात्फुल्लक्षीबकृशोल्लाघा इति निष्ठातकारस्य लत्वं नि
पातः सर्जकासनबंधूकपुष्पप्रियकजीवका इत्यमरः शरैः पूरितानि वक्त्र
रंध्राणि येषां तान् व्याघ्रान् शिक्षाविशेषेणाभ्यासातिशयेन लघुहस्ततया क्षिप्र
हस्ततया निमेषात् तूणी चकार तूणपूरिता इत्यर्थः ७० निर्घातेति कुंजेषु
वनेषु निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरः सिंहान् जिघांसुर्हन्तुमि
च्छुः निर्घातो व्योमोत्थ औत्पातिकः शब्दविशेषः तद्वदुग्रैः ज्यानिर्घोषैः रोद्रैः

र॰टी॰९ मेघीशब्दैः क्षोभयामास अक्षोभ्यते तेषां सिंहानां संबंधिना वीर्येण उदग्रे
१८ उन्नते मृगेषु विषये यो राजशब्दः तस्मिन्नभ्यसूयापरः अभूत् नूनमन्यथा कथ
मेतान् विहन्यादित्यर्थः मृगाणामिति पाठे समासे गुणभूतत्वात् राजसंबं
धे दुर्घटः किंत्वावृत्तमेतत् ७१ तानिति काकुत्स्थो दशरथः कैः गजकुलेषु ब
द्धं तीव्रं वैरं येषां तान् कुटिलेषु नखाग्रेषु लग्नाः मुक्ताः गजकुंभमौक्तिकानि येषां ता
न् सिंहान् हत्वा आत्मानं रणेषु कृतकर्माणां कृतोपकाराणां गजानामानृण्यं अनृ
णत्वं मार्गणैः शरैः मार्गणो याचके शरे इति विश्वः गतं प्राप्तमिव अमंस्त मेने
७२ चमरानिति कश्चिच्चमरान् परितः अभितः अभितःपरित इत्यादि द्वितीया १८
विवर्तिताश्वः प्रवर्तिताश्वः आकर्णनिकृष्टान् भल्लानिषु विशेषान् वर्षतीति सतथोक्तः
स नृपो नृपतीनिव तान् चमरान् असितवान् व्यालव्यजनैः शुभ्रचामरैः वियोज्य विरहय्य

सद्यः शान्तिं जगाम शूराणां परकीयमैश्वर्यमेवासह्यं न तु जीवितमिति भावः
पच्छंदसिकं वृत्तं ७३ अपीति स नृपः तुरंगसमीपादुत्पतंतं आसादि अश्वसमी
पाद्विरंसंचितमपीत्यर्थः सुप्रहारमपीत्यर्थः रुचिरकलापं भासुरमयूरबर्हं मयूरो
ऽतीति मयूरः दृष्ट्वा दरादित्वात् साधुः चित्तेन मात्मनोऽनुकीर्यमाणे रत्यां विरत्यां वि
गलितबंधे प्रियायाः केशपाशे सपदि गतमनस्कः प्रवृत्तचित्तः उरः प्रभृतेभ्यः
कवितिरूपं न बाणलक्ष्यं चकार न जहारित्यर्थः ७४ तस्येति कर्कशादि
हारादिति व्यायाम संभवो यस्य तं आनने विलग्नानि जालकानि बिंदवो यस्य
तं बद्धकदंबकं तस्य नृपस्य स्वेदं घर्मजालं सतुषारशीकरः शिशिरांबुकणस
हितः भिन्नाः निर्दलिताः पल्लवानां पुटाः कोशाः येन स वनानिलः वनसंबंधी वा
युः आचचाम जहारेत्यर्थः रथोद्धता वृत्तं ७५ इति विस्मृतेति आत्मनो वि

र॰टी॰२ स्मितान्यकरणीयं स्त्रीरयेन तं विस्मितान्यकार्यांतरमित्यर्थः सखिवेरऊंबिता
२० धृताधूर्यस्यतं ----रितिअप्रत्ययः समासांतः अनुबंधसेवयासंततसेवया
परिवृद्धः प्रवृद्धः रागोयस्यतं नराधिपं मृग्यंते स्यां मृगाइति मृगयापरिचर्यामिग
याठव्याघ्रादीनामुपसंख्यानमिति शप्रत्ययांतो निपातः चतुराविदग्धा
कामिनीवजहार आवकर्षजातु भोगः कामानामुपभोगेन शाम्यतीति भावः
सुमंगलीवृत्तं ७६ सुल्कलितइति सनृपतिः ललितानिकुसुमानिप
कुवानिशय्यायस्यां तां ज्वलिताभिः महौषधिभिरिव दीपिकाभिः सना
थांतानित्यर्थः त्रियासांरात्रिं कचिदसमेतपरिछदः परिहृतपरिजि २१
नः सन्नित्यर्थः अतिवाहयांबभूव गमयामास पुष्पिताग्रवृत्तं ७७
उषसीति उषसिप्रातः पटूनां पटहानामिव ध्वनिर्येषां तैः गजयूथा

नां कर्णैरेव तालैर्घाघभेदैर्विधूतनिद्रः सन् नृपः तत्रवनेमधुराणिविहंगवि – जि
तान्येवमंगलानिगीतानिश्रृण्वन्नरमत ७८ अथेति अथजातुकदाचित्
रुरोः मृगस्यगृहीतवर्त्मास्वीकृतरुरुमार्गो विपिनेवनेपार्श्वचरैरलक्ष्यमाणस्तु
रगवेगादित्यर्थः श्रमफलेनमुखासफेनखिन्नतानुरंगमेणतपस्विभिः गाढ
मवगाढं सेवितां तमसांनामनदीं प्राप ७९ कुंभेति स्तस्यातमसायाअंभसे
कुंभपूरणेनभवउत्पन्नः पचाद्यच् पटुर्मधुरः उच्चैर्गंभीरोनादो ध्वनिरुच्चचार
उदीरयांयतत्रनिनदेसनृपः द्विरदबृंहितंशंकतइतिद्विरदबृंहितंशंकत इतिद्विर
दबृंहितशंकीसन्शब्देनशब्दानुसारेणापततीतिशब्दपातिनमिषुंविससर्ज
८० नृपतेरिति तत्कर्मनृपतेः क्षत्रियस्यप्रतिषिद्धमेवनिषिद्धमेवयदेतत्क
र्मगजवधरूपंपंक्तिरथोदशरथोविलंघ्यलक्ष्मीकामोयुधादन्यत्रकरिवधंनकु

र.टी.९ यदिति शास्त्रमुल्लंघ्य कृतवान् ननु विदुषस्तस्य कथमीदृग्वधाचेष्टितमित्याशं
२१ शंक्याह अपथ इति श्रुतवंतोपि विद्वांसोपि रजोनिमीलिताः रजोगुणावृताः सं
तः न पथा इति अपथं पथो विभाषा इति वा समासांतः अपथं नपुंसकं अपथास्त्व
पथं तुल्यमित्यमरः तस्मिन्नपथे अमार्गे पदं पदमर्पयंति हि निक्षिपंति प्रवर्तंत इ
त्यर्थः वैतालीयावृत्तं ८१ हा तातेति हेत्यार्तो तातो जनकः हा विषादशुग्
गतिषु तातस्तु जनकः पिता चेत्यमरः हा तातेति क्रंदितं क्रोशनमाकर्ण्य
विषण्णो भग्नोत्साहः सन् तस्य क्रंदितस्य प्रकृतसेः गूढं छन्नं प्रभवत्यस्मादि
ति प्रभवः कारणं तमान्विष्यन् शरेण शल्येन प्रोतं स्यूतं शल्यं शंकौ शरे वंशेऽपि इ २१
ति विश्वः स कुंभं मुनिपुत्रं प्रेक्ष्य साक्षात् तिपापितापात् दुःखात् अंतः शल्यं य
स्य सोतः शल्य इवासीत् मत्तमयूरवृत्तं ८२ तेनेति प्रथितान्वयेन

प्रख्यातवंशेन एतेन पापभीरुत्वं सूचितं तेन राज्ञा नु रागा— ऽस्तीर्य ए
छान्वयो ब्रह्महत्याशंकया पृष्टो वृद्धः जलकुंभे निषण्णदेहः स मुनिपुत्रः तस्मै
राज्ञे स्खलद्भिः अक्षरपदैः अशक्तिवशाद् अर्धोच्चारितैरित्यर्थः आत्मानं द्विजे
तरश्वासौ तपस्विसुतश्च तं द्विजेतरतपस्विसुतं कथयांबभूव न तावत् त्रैवर्णि
क एवाहमस्मि किंतु करणः वैश्यात्तु करणः शूद्र्यामिति याज्ञवल्क्यः कुतो
ब्रह्महत्येत्यर्थः तथा च रामायणे ब्रह्महत्याकृतं पापं हृदयादपनीयतां न द्वि
जातिरहं राजन् माभूत्ते मनसो व्यथा शूद्रायामस्मि वैश्येन जातो जनपदा
धिपेति ८३ तच्चोदितेति तच्चोदितेन पुत्रेण चोदितः प्रेरितः पितृसमीपं प्रा
पय्येत्युक्तः सन् नृपतिः अनुधृतशल्यम् अनुसारितशरमेव मुनिपुत्रं अवसन्न
दृशोर्नष्टचक्षुषोः अंधयोरित्यर्थः पित्रोः माता पित्रोः पिता मात्रेत्येकशेषः सका

र॰टी॰२ त्रांसमीपं निनाय इदं च रामायणविरुद्धं अथाहमेकस्तं द्विजं नीत्वा तौ भ
२२, र्तृदुःखितौ अस्पर्शयमहं पुत्रं तं मुनिः सह भार्यया इति नदीतीरे एवं मृतं पुत्रं
प्रति पित्रोरानयनाभिधानात्तथागतं चेतसं गृह्य एकश्चासौ पुत्रश्च एकपु
त्रस्तमेकपुत्रं एकग्रहणं पित्रोरनन्यगतिक— सुवनार्थं तं मुनिपुत्रमुपेत्य
संनिकृ— — र्जनातः परिभ्रांत्यास्यचरितं स्वकृताभ्यां पितृभ्यां क्रियाग्रहणा
च्चतुर्थी राज्ञां स कथितवान्. ८४ तावितिजया च पतिश्च दंपती जाया
राजदंतादिषु जायाशब्दस्य दंभावो जंभावश्च विकल्पेन निपातितः दंप
ती जंपती जायापती भार्यापतिः समावित्यमरः बकुविलष्यभूषितं परिदेव्याश्रि
तो रुरुस्तो वक्षसः पंचम्यास्तसिल् निरवातं शल्यं शरं प्रहर्ता राज्ञा उद्धारयतां २२
उद्धरयामास सुतः स द्विजशिशुः पराभूतः अभूत् अथ वृद्धो हस्ते अर्पितैर्नयनवारिभिरेव
शापदानस्य[illegible] ८५

दिष्टेति हे राजन् भवानप्येते वयसि अहमिव पुत्रशोकात् दिष्टांत ग्राला
वसानं मरणमित्यर्थः दिष्टः काले च दैवः स्याद्दिष्टमिति विश्वः आक्रम्यतीति
उल्लंघंतमाक्रांतः पूर्वदाहृतः पूर्वं रित्याक्रांतपूर्वः सुप्सुपेति समासः तंत्र
थममपकृतमित्यर्थः मुक्तविषमपकारिणं पश्चादुत्सृष्टविषं भुजंगमिवे
वक्षितं तं वृद्धं प्रथमापराधः प्रथमापराधीकर्तरि क्तः इदं च सहने कारण
मुक्तं शापप्रदानात्प्रथमपराधिनं पश्चादपराधी मुनिं कोशलाधिपतिः श्री
८६ वासं शाप इति अदृष्टात् तया नपस्वशोभायेन ता स्मिन् पुत्रके म
यि भगवता वज्रपातयत्वा दित्यादि तदुत्कक्कं अयं पुत्रशोकान्म्रियस्वे
त्येवंरूपः शापोऽपि सानुग्रहः दग्धकुमारीवरन्यायेन ईप्सितप्राप्तिः नांतरी

र.टी.९

२२ यत्वात् सोपकार एव निग्रहकस्यानुग्रहकत्वं अर्थांतरन्यासेनाह कृ
ष्यामिति इंधनैः काष्ठैः इद्धः प्रज्वालितोऽज्वलनोऽग्निः कृष्यां कर्षणार्हां
रूउपधाच्चेति क्यप् क्षितिं दहन्नपि बीजप्ररोहणां बीजांकुराणां जननीमु
त्पादनक्षमां करोति ८१ इत्थमिति इत्थं गते वृत्ते सति वसुधाधिपेन
राज्ञा गतघृणो निःकरुणोऽहं हंतत्वादित्यर्थः अत एव वध्यः वधार्होऽयं
जनः अयमिति राज्ञोऽनिर्देशादादरेण स्वात्मनिर्देशः किंविधत्तामित्यभि
हितः उक्तः मया किंविधेयमिति विज्ञप्तमित्यर्थः स मुनिः सभार्यः परासु
प्रयं गतासुमनुगंतुमनो यस्य सोऽनुगंतुमनाः कृतान्वानवतः साग्नीनेए २२
धान् काष्ठानियाचे न च याच्यात्मदोषः ८८ प्राप्तेति प्राप्तानुरा

...सनकाष्ठभरणादिरूप सा...
त्वात् संपाद्यपातके न मुनिवधनिमित्तेन विलुप्तधृतिर्नष्टोत्साहः अ
तर्निविष्टपदं लब्धस्थानं आत्मविनाशहेतुं शापं अंबुराशिरौर्वज्वल
नं वडवानलं न इव और्वस्तु वाडवो वडवानलः इत्यमरः दधत् दृत्तः
निववृते ८९ ॥इति श्रीपदवाक्यप्रमाणश्रीमहोपाध्या
कोलाचल मल्लिनाथसूरिविरचितायां रघुवंशटीकायां संजीवि
नीसमाख्यायां नवमसर्गः श्रीसदाशिवो जयति ॥
शके १६२१ सर्वधारी विरोधी संवत्सरे चैत्र शु. ९ करमरकरोपनामक
हरिणा श्री त्र्यंबकेश्वरसन्निधौ लिखितं लेखकपाठकयोः शुभं